दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

**पञ्चाङ्गम्**
गतदिने वि.सं. २०८३,
कलियुगाब्धः ५१२७ बसन्त-ऋतुः
सूर्यः उत्तरायणम् वैशाखकृष्णद्वादशी
बैशाख ०१ प्रविष्ठांशः मङ्गलमयः भवेत्

■ पृष्ठ-4 ■ वर्ष-5 ■ अङ्क-172 | 1 | अप्रैल 14, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 १९ वर्षीयायाः युवतयाः हत्याः हिमाचलप्रदेशस्य मण्डीजनपदस्य घटना, मार्गमध्ये कण्ठं छित्त्वा हता

3 राष्ट्रनिर्मातुः डॉ. भीमराव अम्बेडकरस्य जयन्ती-महोत्सवः

4 रूद्रानन्द-सेवक-महिला-मण्डल्या बनूड़ी-गौशालायै लक्षाधिकं (१,०९,०००) धनं प्रदत्तम्

## सुभाषितम्

**सत्यं माता पिता ज्ञानं,
धर्मो भ्राता दया सखा।
शान्तिः पत्नी क्षमा पुत्रः,
षडेते मम बान्धवाः।।**

भावार्थः- सत्यवादिता मेरी माता के समान है, ज्ञान मेरे पिता के समान है, धर्म मेरे भाई के समान है, दया मेरे मित्र के समान है तथा शान्ति पत्नी के समान है, क्षमाशीलता मेरे पुत्र के समान है। इस प्रकार ये ६ गुण ही मेरे निकट सम्बन्धी हैं।

## गुजरातस्य लखतर-विरामगाम-राजमार्गे एकस्यां मार्गदुर्घटनायां सप्ततीर्थयात्रिणः मारिताः अन्ये च व्रणिताः अभवन्



गुजरातस्य, सुरेन्द्रनगर-जनपदस्य छराडेति ग्रामं निकषा लखतर-विरामगाम-राजमार्गे एकस्यां मार्गदुर्घटनायां सप्ततीर्थयात्रिणः मारिताः अन्ये च व्रणिताः अभवन्। एषा घटना तदा अभवत् यदा एकेन ट्रकयानेन श्रद्धालुनाम् एकस्य समूहस्य मर्दनं कृतम्, ये राजकोटतः बहुचराजीं यावत् पदातिरेव यात्रां कुर्वन्तः सन्ति। सर्वेऽपि मृतकाः राजकोटक्षेत्रस्य निवासिनः आसन्। राष्ट्रपतिना द्रौपदीमुर्मूवर्यया प्रधानमन्त्रिणा नरेन्द्रमोदिना च गुजरातस्य सुरेंद्रनगरजनपदे विहितायाम् अस्यां दुर्घटनायां जातां जनहानिं प्रति गभीरं शोकं व्यक्तीकृतम् सहैव एकस्मिन् सार्वजनिकसञ्जालीयसंदेशे द्वाभ्यामेव व्रणितानां शीघ्रस्वास्थ्यलाभाय प्रार्थना कृता।

## नवदेहल्यां नारी-शक्ति-वन्दन-सम्मेलनं सम्बोधितवान् प्रधानमन्त्री



प्रधानमन्त्री नरेन्द्रमोदी अवदत् यत् भारतस्य नारी शक्तिः स्वकीयेन दृढ-साहसेन, आत्मविश्वासेन, परिश्रमेण च अनवरतं नूतनान् उत्कर्षान् अवाप्नोति। नवदेहल्यां नारी-शक्ति-वन्दन-सम्मेलनं सम्बोधयन् श्रीमोदी प्रोक्तवान् यत् एकविंशति-शताब्द्यां भारतं महिला-सशक्तीकरणाय समर्पितं कञ्चन ऐतिहासिकं निर्णयं स्वीकर्तुं सज्जं वर्तते । तेन प्रतिपादितं यत् संसद् नूतनम् इतिहासम् रचयितुं समेधते, येन अतीतस्य भविष्यस्य च आकाङ्क्षाः पूरिताः भविष्यन्ति। प्रधानमन्त्रिणा सबलं प्रोदीरितं यत् लोकतन्त्रे महिलारक्षणम् अतीव आवश्यकं वर्तते। तेन स्पष्टीकृतं यत् महिलानां सहभागिता लोकतन्त्रं सुदृढीकरोति । श्रीमोदी अवदत् यत् पञ्चायती राजसंस्थाः महिला नेतृत्वस्य उत्कृष्टम् उदाहरणं वर्तन्ते। साम्प्रतं चतुर्दश-लक्षाधिकाः महिलाः स्थानीय-सार्वजनिक-निकायेषु सेवारताः सन्ति । अत्रावसरे महिला-बाल-विकास-मन्त्री अन्नपूर्णा देवी प्रावोचत् यत् नारी-शक्ति-वन्दनाधिनियमः महिलानां आत्मसम्मानं लोकतान्त्रिक-सहभागितां च सुनिश्चिनोति । देहल्याः मुख्यमन्त्री रेखा गुप्ता अपि प्रधानमन्त्रिणः प्रशंसां कुर्वती प्रोक्तवती यत् कोटिशः जन-धन-लेखानां माध्यमेन महिलाः मुख्यधारायां सम्मिलिताः भवन्ति ।

हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य
एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति
कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११
सङ्केतः- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

## पश्चिमबंगाल-तमिलनाडु-राज्ययोः विधानसभानिर्वाचनाय प्रचाराभियानं द्रुतगत्या विभिन्नदलानां शीर्षनेतारः मतदातृन् वशीकर्तुं कुर्वन्तः जनसभाम्




पश्चिमबंगाल-तमिलनाडु-राज्ययोः विधानसभानिर्वाचनाय प्रचाराभियानं द्रुतगत्या अग्रे प्रवर्तते । विभिन्नदलानां शीर्षनेतारः मतदातृन् वशीकर्तुं जनसभां कुर्वन्तः सन्ति । भाजपेति दलस्य वरिष्ठनेता केंद्रीयगृह-मन्त्री च अमितशाहः बीरभूम-जनपदे दलप्रत्याशिनां समर्थनाय एकां जनसभां समबोधयत् । तेन तृणमूल कांग्रेसेति दलस्य कुशासनं विरुध्य आलोचना कृता । अपरत्र तृणमूल कांग्रेसदलस्य प्रमुखा मुख्यमन्त्री च ममताबनर्जी इत्येषा एकस्यां जनसभायां भाजपादलं विरुध्यः आरोपं प्रख्यापितवती यत् नागरिकता-संशोधनाधिनियमः इत्यस्य अनन्तरं भाजपादलं एनआरसी इत्यस्यापि क्रियान्वयनं कर्तुं प्रयतते ।

## वरिष्ठोपनिर्वाचनायुक्तौ, ज्ञानेशभारती पवन-कुमार शर्मा च पश्चिम बङ्गालस्य यात्रां कुरुतः



वरिष्ठोपनिर्वाचनायुक्तौ, ज्ञानेशभारती पवन-कुमार शर्मा च पश्चिम बङ्गालस्य यात्रां कुरुतः येन आगामि-विधानसभानिर्वाचनानां सज्जतायाः समीक्षा भवेत् । स्वकीये त्रिदिवसीय-यात्रावधौ, ज्ञानेश-भारती पश्चिमबर्धमाने, पूर्ववर्धमाने, हुगलीजनपदे, उत्तर-24 परगना इति जनपदे च जनपदनिर्वाचनाधिकारिभिः, आरक्ष्यायुक्तैः, आरक्ष्याधीक्षकैः, पर्यवेक्षकैः च सह मेलनं सम्वादं च विधास्यति ।

## सम्पूर्णे देशे LPG इत्यस्य आपूर्तिः सामान्या वर्तते - सुजाताशर्मा



सर्वकारः गृहोपभोक्तृभ्यः LPG इत्यस्य शतप्रतिशन्मितापूर्ति सुनिश्चितं करोति सहैव देशे कस्यापि वितरकस्य पार्श्वे LPG इत्यस्य अनुपलब्धतायाः कापि सूचना न प्राप्ता । संयुक्तत्सचिवा नवदेहल्यां सम्बोधयन्ती, जीवाश्मतैल-प्राकृतिक-वात्येधन-मंत्रालयस्य सुजाताशर्मा इत्येषा प्रोक्तवती यत् सम्पूर्ण देशे LPG इत्यस्य आपूर्तिः सामान्या वर्तते । सा अकथयत् यत् LPG इत्यस्य वाणिज्यिकापूर्तिः सप्तति-प्रतिशन्मितं यावत् सुनिश्चिता । अपरत्र गरिष्ठोद्योग-मंत्रालयस्य अतिरिक्तसचिवः डॉ. हनीफकुरैशी इत्येषः अकथयत् यत् सर्वकारेण 'प्रधानमंत्री इलेक्ट्रिक ड्राइव रिवोल्यूशन इन इनोवेटिव व्हीकल एनहांसमेंट' (PM E-DRIVE) इत्यस्याः योजनायाः अन्तर्गतं इलेक्ट्रिक-त्रिचक्रिका-वाहनेभ्यः समर्थनराशिः अष्टाविंशत्यधिक-द्विसहस्रतमाब्दस्य मार्चमासं यावत् वर्षद्वयाय वर्धिता अस्ति ।

## जलियाँवाला बागकाण्डे

### हुतङ्ङ्गतेभ्यः स्वतन्त्रता-सेनानिभ्यः श्रद्धाञ्जलिं समर्पितवन्तः

राष्ट्रपतिपदासीना द्रौपदीमुर्मूः प्रधानमन्त्री नरेन्द्रमोदी च एकोनविंशत्यधिक-ऊनविंशति-शततमे वर्षे अस्मिन्नेव दिने जलियाँवाला बागकाण्डे हुतङ्ङ्गतेभ्यः स्वतन्त्रता-सेनानिभ्यः श्रद्धाञ्जलिं अर्पितवन्तौ । राष्ट्रपतिः मुर्मूः सामाजिक सञ्जालीय-माध्यमे स्वसन्देशे समुल्लिखितवती यत् अनया घटनया स्वतन्त्रतायै देशवासिषु नूतना चेतना दृढ सङ्कल्पश्च समुद्भूतः । सा प्रोक्तवती यत् राष्ट्र तेभ्यः सर्वदापि कार्तज्ञं प्रकटिष्यति । स्वसन्देशे प्रधानमन्त्री नरेन्द्रमोदी प्रतिपादितवान् यत् तेषां बलिदानं देशवासिनां अपूर्व-साहसस्य प्रतीकं वर्तते। श्रीमोदिना विशेषतः उल्लेखितं यत् तेषां धैर्यं तथा च अविचल-सङ्कल्पः आगामि-वंशं स्वतन्त्रतायाः, न्यायस्य, च मूल्यानां रक्षणाय निरन्तरं प्रेरयिष्यति।

# १९ वर्षीयायाः युवतयाः हत्याः हिमाचलप्रदेशस्य मण्डीजनपदस्य घटना, मार्गमध्ये कण्ठं छित्त्वा हता




**हिमसंस्कृतवार्ताः- सरकाघाटम्।** सरकाघाट-उपमण्डलस्य गोपालपुरे सोमवासरे प्रातः महाविद्यालयं गच्छन्त्याः एकायाः १९ वर्षीयायाः युवतयाः कण्ठं छित्त्वा हत्या कृता। हत्यायाः कारणं तावत् न ज्ञातम्। क्षेत्रे चर्चा अस्ति यत् द्वौ द्विचक्रिका-सवारौ युवकौ एतां घटनां कृतवन्तौ। मृतका छात्रा १९ वर्षीया सिया गुलेरिया इति ज्ञाता, सा नैण-ग्रामस्य (गोपालपुर, सरकाघाट) निवासिनी आसीत्।

## हत्या किमर्थं कृता?

घटनायाः सूचनां प्राप्य सरकाघाट-आरक्षकदलं (Police) घटनास्थलं प्राप्य शवं स्वाधीनं कृत्वा अन्वेषणं प्रारब्धवान्। हत्यायाः वास्तविकं कारणं तु अभियुक्तानां ग्रहणात् परमेव ज्ञायते। आरक्षकैः एकः अभियुक्तः गृहीतः। सः फतेहपुर-पञ्चायतस्य थाना-ग्रामे ग्रामीणैः धृतः। अधुना सः आरक्षक-संरक्षणे अस्ति। आरक्षकाधीक्षकः विनोद कुमारः, अन्ये वरिष्ठाधिकारिणः च घटनास्थले उपस्थिताः सन्ति। कथ्यते यत् अभियुक्तः हत्यां कृत्वा गोधूमक्षेत्रे निलीनः आसीत्, यं दृष्ट्वा ग्रामीणैः आरक्षकाः सूचिताः।

## सर्वत्र भयस्य वातावरणम्

आरक्षकविभागात् प्राप्तसूचनानुसारं अन्येषाम् अभियुक्तानाम् अन्वेषणाय विभिन्नदलानां गठनं कृतम् अस्ति। पार्श्ववर्तिनां क्षेत्राणां 'सीसीटीवी' (CCTV) दृश्यानां परीक्षणं क्रियते। अनया घटनया सम्पूर्ण क्षेत्रे भयस्य वातावरणं व्याप्तम् अस्ति। मण्डी-आरक्षकाधीक्षकः विनोद कुमारः अवदत् यत् आरक्षकाः गम्भीरतया अन्वेषणं कुर्वन्ति, शीघ्रमेव सर्वे अपराधिणः कारागारे भविष्यन्ति।

## प्रमुखप्रतिक्रियाः

नेता प्रतिपक्षः जयराम ठाकुरः अवदत्- "सरकाघाटे अनया घटनया मनः विचलितं भवति। देवभूमौ दिवाकाले ईदृशी घटना अकल्पनीया अस्ति। अनया घटनया न केवलं प्रदेशः लज्जितः, अपि तु ते सर्वे परिवाराः भीताः सन्ति येषां पुत्र्यः शिक्षार्थं गृहात् बहिः गच्छन्ति। अस्मिन् जघन्य-अपराधे सम्मिलितानां जनानां तादृशः दण्डः भवेत् यः भविष्ये उदाहरणं भवेत्। ईश्वरः दिवंगतपुत्र्याः आत्मने शान्तिं ददातु, परिवारस्य च दुःखं सहिष्णुं करोतु।"

### स्थानीय-नेतुः यदोपति ठाकुरस्य कथनम्-

"अधुनैव मया इदं दुखदं समाचारं प्राप्तं यत् गोपालपुर- पञ्चायतस्य नैण-ग्रामनिवासिन्याः छात्रायाः केचन अज्ञातैः क्रूरतापूर्वकं हत्या कृता। मया आरक्षकविभागे अधिकारिभिः सह सम्भाषणं कृतम् अस्ति येन अपराधिनां शीघ्रं ज्ञानं कृत्वा तेषां विरुद्धं कठोरात्कठोर-कार्यवाही भवेत्।"

# चेस्टर हिल' विवादः- पूर्व-मुख्यसचिवस्य विनीत चौधरिणः प्रवेशेन वर्धितं राजनैतिकं तापमानम्



**हिमसंस्कृतवार्ताः- कार्यालयीयः प्रतिनिधिः।** 'चेस्टर हिल' विवादे अधुना अन्यस्य पूर्व- मुख्यसचिवस्य विनीत चौधरिणः प्रवेशेन प्रकरणमिदम् अधिकोष्णं जातम्। पूर्वमेव अधिकारी-तन्त्रस्य अन्तः परस्परं संघर्षेण आरोप- प्रत्यारोपद्वारा च चर्चायां स्थितः एषः विषयः अधुना राजनैतिकं वर्णं गृहीतवान् अस्ति। चौधरी महोदयेन हरियाणाराज्ये भ्रष्टाचारस्य आरोपैः वेष्टितानां भारतीय-प्रशासनिक-सेवा (IAS) अधिकारिणां विरुद्धं जातायाः त्वरितकार्यविधेः उल्लेखं कुर्वन् हिमाचल-सर्वकारस्य दृष्टिकोणे प्रश्नाः उत्थापिताः। पूर्व-मुख्यसचिवेन सामाजिकमाध्यमे प्रेषितायां विवृतौ (Post) लिखितं यत् हरियाणा-राज्ये भ्रष्टाचारस्य गम्भीर- आरोपाणां सम्मुखम् आगमनेनैव सर्वकारेण द्वौ वरिष्ठौ आई.ए.एस. अधिकारिणौ निलम्ब्य कठोरः सन्देशः दत्तः, यदा तु हिमाचलप्रदेशे तादृशाः एव आरोपाः 'आन्तरिक-कलहः' इति उक्त्वा उपेक्षितुं प्रयतन्ते।तेन व्यङ्ग्यं कुर्वन् कथितं यत् यदा आरोपाः एतादृशाः गम्भीराः सन्ति, तदा तान् केवलं त्रयाणाम् अधिकारिणां मध्ये वैयक्तिकं मतभेदं मत्वा निराकरणं न करणीयम्। मुख्यमन्त्रिणः सुखविन्दर-सिंह-सुक्खु-वर्यस्य तस्मिन् वक्तव्ये अपि प्रश्नाः उत्थापिताः, यस्मिन् तेन कथितं यत् तस्मै प्रकरणस्य पूर्णं ज्ञानं नास्ति। चौधरी-महोदयेन उक्तं यत् प्रदेशस्य प्रमुखत्वेन एतादृशेषु संवेदनशीलेषु उपालम्भेषु त्वरितं संज्ञानं स्वीकर्तव्यम्, सप्ताहावधिं यावत् 'सूचना- एकत्रीकरणं' इति कथनं उचितं न मन्यते। अन्ते उत्तरदायित्वं तु मुख्यमन्त्रिणः कार्यालये एव आगच्छति। ईदृशेषु प्रकरणेषु उत्तरदायित्वं निश्चितं करणीयम्। अपरपक्षे, अस्मिन् विवादे वर्तमान-मुख्यसचिवः सञ्जय गुप्तः पूर्वमेव द्वौ पूर्व-मुख्यसचिवौ आर.डी. धीमानं श्रीकान्त बाल्दिं च आरोपचक्रैः वेष्टितवान् अस्ति। आरोपाणां प्रत्युत्तराणां च कारणात् एषः विषयः इदानीं प्रशासनिक-वीथिषु चर्चायाः बृहत् विषयः संजातः।

# 'चिट्टा' तस्करी-दलस्य नायकः चण्डीगढ़तः गृहीतः

**हिमसंस्कृतवार्ताः- शिमला।** शिमला- आरक्षकदलेन (पुलिस) रोहड़ूक्षेत्रे पञ्जीकृतस्य 'चिट्टा' तस्करी-प्रकरणस्य अन्वेषणं अग्रे वर्धयित्वा अन्वय-शृङ्खलायाः आधारेण दलस्य नायकं चण्डीगढ़तः ग्रहणे सफलता प्राप्ता। आरक्षकदलेन अस्यां कार्यविधौ आरोपी अमित गुप्ता (३० वर्षाणि, निवासी-सरायं दनोली, बाराबंकी, लखनऊ) ११ अप्रैल दिनाङ्के बन्दीकृतः। न्यायालये प्रस्तुतीकरणानन्तरं आरोपी १४ अप्रैल २०२६ पर्यन्तं आरक्षक-प्रशासने (Police Remand) प्रेषितः अस्ति।

**प्रकरणस्य पृष्ठभूमिः**

शिमला-मण्डलस्य आरक्षकाधीक्षकः (SSP) गौरवसिंहः अवदत् यत् अस्य प्रकरणस्य आरम्भः १५ मार्च २०२६ दिनाङ्के अभवत्, यदा रोहड़ू-पुलिसस्थानके दलं भ्रमणकाले एकं सन्दिग्धं युवकं ग्रहीतुं सफलं जातम्। अन्वेषणकाले तस्य समीपात् ९.१७ ग्रामं 'चिट्टा' इति मादकद्रव्यं प्राप्तम्। आरोपिणः परिचयः सार्थकः (२९ वर्षाणि, निवासी-समाला, रोहड़ू, शिमला) इति रूपेण अभवत्। अस्मिन् विषये रोहड़ू-आरक्षकस्थाने एन. डी. पी. एस. (NDPS) अधिनियमस्य धारा २१, ६१ तथा ८५ अन्तर्गतं अभियोगं पञ्जीकृत्य सः गृहीतः।

**तकनीकी-अन्वेषणेन रहस्योद्घाटनम्**

अस्य बन्दीग्रहणस्य पश्चात् शिमला-आरक्षकदलेन गहनम् अन्वेषणं प्रारब्धम्। अन्वेषणकाले आरोपिणः वित्तकोष-संख्याना, भ्रमणभाषस्य तथा दूरसंचार-अभिलेखस्य तकनीकी-विश्लेषणं कृतम्। अङ्कीय तथा वित्तीय-साक्ष्याणाम् आधारेण आरक्षकदलेन ज्ञातं यत् रोहड़ू-चिड़गांव-क्षेत्रयोः 'चिट्टा' तस्करी-सम्बद्धम् एकं सङ्घटितं तन्त्रं सक्रियं वर्तते, यस्य सञ्चालनं बाह्यराज्यात् क्रियते स्म। अन्वेषणे ज्ञातं यत् अस्य तन्त्रस्य सञ्चालनं कथितरूपेण अमित गुप्ता करोति स्म। सः लखनऊ-नगरे स्थित्वा स्थानीययुवकानां माध्यमेन पृथक् पृथक् स्थानेषु अल्पमात्रायां 'चिट्टा' स्थापयित्वा स्थान- आधारित- वितरण' माध्यमेन अस्य अवैध-आपूर्तिं करोति स्म।



आरोपिणः ग्रहणाय आरक्षकदलं पूर्वं लखनऊ-नगरम् अपि गतवत्, किन्तु सः ततः पलायितः। ततः परं निरन्तर- निरीक्षणेन प्रयासेन च आरक्षकदलेन सः चण्डीगढ़तः गृहीतः। आरक्षकाधीक्षकः गौरवसिंहः अवदत् यत् शिमला- आरक्षकदलेन मादकद्रव्याणां विरुद्धं विशेषमभियानं निरन्तरं प्रचलति। अस्मिन् अभियाने 'अन्वयश्रृङ्खला' संस्थाप्य दलस्य मुख्य- आपूर्तिकर्तुः समीपगमनं महती सफलता अस्ति। सः उक्तवान् यत् आरक्षकदलं अस्मिन् प्रकरणे सम्मिलितानाम् अन्येषां जनानां भूमिकायाः अपि अन्वेषणं करोति, तन्त्रं च पूर्णतया विनाशयितुं अग्रे अपि कार्यविधयः भविष्यन्ति। युवकान् नशापाशात् रक्षितुं, तस्करी-तन्त्रं च स्थगयितुं ईदृशेषु प्रकरणेषु तकनीकी-वैज्ञानिक-अन्वेषणं सुदृढं क्रियते। अस्मिन् प्रकरणे अन्यानां सम्भाव्य-आरोपिणाम् अन्वेषणम् अपि प्रचलति।

# ठोडा-क्रीडायाः हुङ्कारः, धनुर्बाणयोः टङ्कारः, अद्यापि रक्तधमनीषु धावति महाभारतकालस्य इतिहासः





**हिमसंस्कृतवार्ताः- शिमला।** देवभूमि- हिमाचलस्य उपत्यकासु यत्र आधुनिकतया पदप्रसारः कृतः, तत्रैव उपरि- शिमलाक्षेत्रस्य तथा सिरमौर-जनपदस्य दुर्गमक्षेत्रेषु अद्यापि महाभारतकालस्य इतिहासः स्वपूर्णभव्यतया जीवति। वयं पारम्परिक- 'ठोडा'-क्रीडायाः विषये वदन्तः स्मः। वैशाखी-पर्वणः अनन्तरं उपरि-शिमलायां सिरमौरे च 'बिशु' मेलापकाः प्रारप्स्यन्ते, एतेषु मेलापकेषु च 'ठोडा' विशेषम् आकर्षणं भविष्यति। ठोडा-क्रीडायां केवलं धनुर्बाणाः न चलन्ति, अपितु शताब्दप्राचीनायाः 'शाठी' तथा 'पाशी' इति खून्दयोः (समूहयोः) परस्पर-प्रतिद्वन्द्वितायाः गौरवशालि-परम्परायाः च प्रदर्शनं दृश्यते।

## शाठी-पाशी खून्दयोः परम्परा

लोकमान्यतानुसारं ठोडा-क्रीडायाः इतिहासः महाभारतकालेन सह सम्बद्धः अस्ति। अस्मिन् भागं गृह्णन्तौ द्वौ समूहौ शाठी (कौरव-पक्षः) तथा पाशी (पाण्डव-पक्षः) इति उच्येते। एतौ समूहौ स्थानीयभाषायां 'खून्द' इति नाम्ना ज्ञायेते। क्रीडायाः आरम्भात् पूर्वं पटह-नगाड़ा- नरसिङ्गादीनां वाद्यानां घोषेण सम्पूर्णं वातावरणं वीररसेन आपूरितं भवति। योद्धाः पारम्परिकं वेशभूषां धारयन्ति, पादयोः च गुरूणि (भारी) पादत्राणानि जानुपर्यन्तं सुरक्षाकवचं च बध्नन्ति।

**कठोराः नियमाः-**

अस्याः क्रीडायाः नियमाः अपि अत्यन्तं कठोराः सन्ति। धानुष्कस्य लक्ष्यं प्रतिद्वन्द्विनः शरीरं न, अपि तु तस्य पादात् आरभ्य जानुपर्यन्तं जङ्घाभागः भवति। बाणप्रहारकः योद्धा नृत्यन् विविधकौशलैः प्रहारं करोति, यदा तु सम्मुखस्थः योद्धा विद्युत्- गत्या आत्मानं रक्षति। यदि बाणः साक्षात् पादे जङ्घायां वा लगति, तर्हि अङ्काः प्राप्यन्ते, परन्तु जानुतः उपरि प्रहारः नियमानां विरुद्धः मन्यते।

## ठियोग-रोहडू-चौपाल-जुब्बल-कोटखाई क्षेत्रेषु अद्यापि प्रचलति ठोडा

परिवर्तमानेन समयेन सह धनुर्बाणानां स्थानं सांकेतिक-क्रीडाभिः स्वीकृतं, परन्तु सिरमौर- जनपदस्य गिरिपार-क्षेत्रे, शिमलायाः ठियोग, रोहडू, चौपाल, जुब्बल-कोटखाई चेत्यादिषु उच्चक्षेत्रेषु अद्यापि इयं क्रीडा स्वमौलिकतां रक्षति। अधुना अस्याः क्रीडायाः संरक्षणाय बहवः क्रीडासंस्थाः विभिन्नस्तरेषु ठोडा-स्पर्धाः अपि आयोजयन्ति। नेरवा-क्षेत्रस्य वृद्धः ठोडा-क्रीडकः सन्तरामढाढू महोदयः कथयति यत् "ठोडा अस्माकं रक्तधमनीषु प्रवहन् इतिहासः अस्ति।"

# बनूड़ी-गौशालायां श्रीमद्भागवतकथायाः तृतीयदिवसः, साई-भक्तैः कृतं गो-पूजनम्



**जसवां कोटला (देहरा):** जसवां कोटला क्षेत्रस्य रैल-पञ्चायतान्तर्गतायां बनूड़ी-गौशालायां प्रचल्यमानायाः श्रीमद्भागवत-महापुराणकथायाः तृतीये दिवसे भक्तिमयम् वातावरणं दृष्टम्। अस्मिन् अवसरे श्रीसत्यसाई-सेवा-सङ्गठनस्य भक्तैः विधिपूर्वकं पूजनं कृत्वा गौशालायां गवां पूजनं विहितम्।

*अस्मिन् कार्यक्रमे श्रीसत्यसाई-सेवा-सङ्गठनस्य प्रान्ताध्यक्षाः तथा च धर्मशाला-केन्द्रीयविश्वविद्यालयस्य पूर्व-कुलपतयः प्रो. योगेन्द्र वर्मा महोदयाः मुख्यतिथिरूपेण उपस्थिताः आसन्।* स्वसम्बोधने ते अवदन् यत्—

"सत्यसाई बाबा महोदयैः अस्मभ्यं सेवायाः यत् कार्यं दत्तं, तत्र गो-सेवा मुख्या अस्ति। सन्तोषस्य विषयोऽयं यत् सङ्गठनस्य माध्यमेन बनूड़ी-गौशालायां साई-भक्तैः पूर्णनिष्ठया एतत् सेवाकार्यं क्रियते।" तस्मिन् समये सङ्गठनस्य काङ्गड़ा-जनपदाध्यक्षः शेष भूषण शर्मा महोदयः, गौशालायाः महासचिवः राजकीय-विद्यालय-देहरायाः प्रधानाचार्यः च अनिल वर्मा महोदयाः स्वपरिवारैः सह पूजने भागं गृहीतवन्तः।अस्यां कथायां बहवः श्रद्धा◌ुलवः उपस्थिताः आसन्, येन सम्पूर्णं क्षेत्रं भक्तिरसेन आप्लुतं जातम्।

# राष्ट्रनिर्मातुः डॉ. भीमराव अम्बेडकरस्य जयन्ती-महोत्सवः



देहरा, हिमाचलप्रदेशः: प्रतिवर्षम् इव अस्मिन् वर्षे अपि अप्रैल-मासस्य चतुर्दशदिनाङ्के (१४ अप्रैल) सम्पूर्णे देशे 'संविधानशिल्पिनः' भारतरत्न-डॉ. भीमराव अम्बेडकर महोदयस्य जन्मजयन्ती सोत्साहं मानयिष्यते। डॉ. अम्बेडकरः न केवलं कुशलः राजनीतिज्ञः, अपितु प्रखराः अर्थशास्त्रिणः, समाजसुधारकाः, महान् विधिवेत्तारः च आसन्।

## प्रारम्भिकं जीवनं सङ्घर्षश्च

डॉ. भीमराव अम्बेडकरस्य जन्म १८९१ तमे वर्षे मध्यप्रदेशस्य 'महू' नामके स्थाने अभवत्। तस्य जीवनं सङ्घर्षमयं किन्तु प्रेरणादायी आसीत्। समाजस्य अस्पृश्यता-कुप्रथायाः दमनं सोढ्वा अपि तेन उच्चशिक्षा सम्पादिता। सः दृढनिश्चयी आसीत् यत् ज्ञानमेव तच्छक्तिः अस्ति, येन समाजस्य दुर्दशां परिवर्तयितुं शक्यते।

## संविधान-निर्माणं सामाजिकं योगदानं च

भारतीय-संविधानस्य निर्माणे डॉ. अम्बेडकरस्य भूमिका अद्वितीया अस्ति। सः 'संविधान-प्रारूप-समित्याः' अध्यक्षरूपेण राष्ट्रस्य आधारशिलां निर्मितवान्। तस्य दृष्टौ सर्वे भारतीयाः समानाः आसन्। तेन उक्तं यत्—

## "शिक्षितः भव, सङ्गठितः भव, सङ्घर्षं च कुरु।"

अनेन मन्त्रेण सः दलित-वञ्चित-शोषितवर्गाणां कृते आत्मसम्मानस्य मार्गं प्रशस्तं कृतवान्। महिलानां कृते अपि 'हिन्दू-कोड-बिल' माध्यमेन तेन समानाधिकाराणां समर्थनं कृतम्।

## आधुनिक-भारते तस्य प्रासङ्गिकता

अद्यतन-युगे अपि डॉ. अम्बेडकरस्य विचाराः अतीव प्रासङ्गिकाः सन्ति। हिमाचलप्रदेशस्य सन्दर्भे अपि विभिन्न-शैक्षणिक-संस्थासु तस्य स्मृतौ कार्यक्रमाः आयोज्यन्ते। सः अस्मान् पाठयति यत् जाति-धर्म-भेदात् उपरि उत्थाय राष्ट्रहितमेव सर्वोपरि मन्येत। अस्यां जयन्त्यां वयं सर्वे सङ्कल्पं कुर्मः यत् तस्य सामरस्यस्य, समानतायाः, भ्रातृत्वस्य च सन्देशं जन-जनं प्रति प्रापयिष्यामः। डॉ. भीमराव अम्बेडकरस्य स्वप्निल-भारतस्य निर्माणमेव तस्मै महते महापुरुषाय सत्यपूता श्रद्धाञ्जलिः भविष्यति।

## राष्ट्रपति-महोदयायाः डॉ. बी.आर. अम्बेडकर-जयन्ती-पूर्वसन्ध्यायाः शुभाशयाः

भारतस्य राष्ट्रपतिः श्रीमती द्रौपदी मुर्मु महोदया डॉ. बी.आर. अम्बेडकर-जयन्त्याः पूर्वसन्ध्यायां देशस्य सर्वेभ्यः नागरिकेभ्यः हार्दिकान् शुभाशयान् व्याहृतवती। स्वसन्देशे राष्ट्रपति-महोदया डॉ. अम्बेडकरं प्रति श्रद्धाञ्जलिं समर्पितवती।

# श्री १००८ गद्दी बाबा नकोदर दास इत्यत्र रामायण-पाठेन कीर्तनेन च वैशाखी-महोत्सवस्य शुभारम्भः





**धर्मशाला (चिन्तपूर्णी),** हिमाचलप्रदेशः: धर्मशालायाः चिन्तपूर्णी-मार्गे स्थिते पावन-स्थले श्री १००८ गद्दी बाबा नकोदर दास गद्द्यां भव्यधार्मिक-अनुष्ठानस्य आयोजनं विहितम्। १३ अप्रैल दिनाङ्के आयोजिते अस्मिन् कार्यक्रमे बहुसङ्ख्यकाः श्रद्धालवः सम्मिलिताः भूत्वा बाबा-महोदयानां आशीर्वादं प्राप्तवन्तः।

## रामायणपाठस्य समापनं कीर्तनं च-

धार्मिक-कार्यक्रमस्य आरम्भः रामायणपाठेन अभवत्, यस्य विधिवत् समापनं (भोगः) सोमवासरे सम्पन्नम्। पाठान्तरं विशेष-कीर्तन-दरबारस्य आयोजनम् अभवत्, यत्र भजन-गायकानां मधुरस्वरेण सम्पूर्णं वातावरणं भक्तिमयं जातम्। उपस्थिताः भक्ताः बाबा-महोदयानां महिम्नः गुणगानं कृत्वा पुण्यतिथौ स्वश्रद्धाञ्जलिं समर्पितवन्तः।

**महन्त-उपेन्द्र-पाराशर-महोदयानां सम्बोधनम्-गद्द्याः** वर्तमानाः महन्ताः श्री उपेन्द्र पाराशर महाराजाः अस्मिन् अवसरे विधिपूर्वकं पूजनं चक्रुः। आगतान् भक्तान् सम्बोधयन्तः ते अवदन् यत्—"परमात्मा अस्माकम् अन्तःस्थितः अस्ति, यः अस्माकं सर्वेषां शुभाशुभ-व्यवहाराणाम् अवलोकनं करोति। यदा भक्ताः बाबा नकोदर दास महोदयानां तपोस्थल्यां आगच्छन्ति, तदा तैः शुद्धचेतसा प्रभोः प्रार्थना करणीया। बाबा-महोदयाः तेषां सर्वाः कामनाः पूरयिष्यन्ति।"

**महाप्रसादस्य (भण्डारा) आयोजनम्-:** अस्मिन् पावन-अवसरे विशाल-भण्डारा-इत्यस्य आयोजनं कृतम्, यत्र सहस्रशः भक्ताः प्रसादं गृहीतवन्तः। आयोजन-समित्याः सदस्यैः उक्तं यत् क्षेत्रस्य सुख-समृद्धि-शान्त्यर्थं प्रतिवर्षं बाबा नकोदर दास महोदयानां स्मृतौ एषः समागमः आयोजितः भवति।

**श्रद्धालूनां सम्मर्दः-:** अस्मिन् कार्यक्रमे स्थानीय-जनैः सह पञ्जाब-प्रान्तस्य सुदूर-क्षेत्रेभ्यः आगताः भक्ताः अपि नतमस्तकाः अभवन्। सम्पूर्णं परिसरं पुष्पैः दीपमालाभिः च सुसज्जितम् आसीत्, यत् आकर्षणस्य केन्द्रम् अभवत्। सायङ्कालपर्यन्तं प्रलम्बिता कीर्तन-धारा भक्तान् भावविभोरान् अकरोत्।

# रूद्रानन्द-सेवक-महिला-मण्डल्या बनूड़ी-गौशालायै लक्षाधिकं (१,०९,०००) धनं प्रदत्तम्









जसवां कोटला (देहरा)-: क्षेत्रस्य रूद्रानन्द सेवक महिला मण्डली (बेह) इत्यस्याः सदस्याः परोपकारस्य गौ-सेवा-सङ्कल्पस्य च अनुकरणीयम् उदाहरणं प्रस्तुतवन्तः। मण्डल्याः पक्षतः रैल-पञ्चायतान्तर्गतायै बनूड़ी-गौशालायै एकलक्षं नवसहस्रं (१,०९,०००) रूप्यकाणां सहायता-राशिः समर्पिता।

**कार्यक्रमस्य विवरणम्-:** गौशाला-परिसरे आयोजिते एकस्मिन् लघु-कार्यक्रमे महिला-मण्डल्याः पदाधिकारीभिः एषा राशिः गौशाला-प्रबन्ध-समित्यै हस्तान्तरिता। अस्याः राशेः सङ्ग्रहणं मण्डल्याः महिलाभिः स्वैच्छिक-दानेन समाज-कल्याणार्थं कृतम् आसीत्। समित्याः कृतज्ञताः गौशालायाः महासचिवः अनिल वर्मा महोदयः महिला-मण्डल्याः अस्य पावन-कार्यस्य प्रशंसां कुर्वन् अवदत् यत्—

"गौ-सेवा एव परमो धर्मः अस्ति। महिला-मण्डल्या प्रदत्तमिदं योगदानं गौशालायाः व्यवस्थासु तथा च गवां संरक्षणे अतीव सहायकम् भविष्यति। वयं एतादृशं सेवाभावं दृष्ट्वा कृतज्ञाः स्मः।"

**महिला-मण्डल्याः सन्देशः-:** महिला-मण्डल्याः सदस्याभिः उक्तं यत् भगवान् रूद्रानन्दस्य आशीर्वादेन ताः सदैव गौ-सेवार्थं तत्पराः सन्ति। ताभिः समाजस्य अन्याः संस्थाः अपि गो-संरक्षणार्थं साहाय्यार्थं च आहूताः।अस्मिन् अवसरे गौशाला-समित्याः सदस्याः, महिला-मण्डल्याः कार्यकर्त्र्यः तथा च अन्याः गणमान्याः उपस्थिताः आसन्।



हिमसंस्कृतवार्ताः, ईदरधीरजः,हैदराबादः

# वार्ता-संवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये।
**काव्या-** नमस्ते नन्दिनि। श्रूयताम् प्रथमा वार्ता। एकेन जनकेन कार्यालय-कार्यस्य शिशु-पालनस्य च भार-कारणेन स्वस्य श्रान्तिः अन्तर्जाले प्रकटिता।
**नन्दिनी-** सत्यम्, नूतन-पितृणां सङ्कटं खलु एतत्। इदानीम् अन्या वार्ता। काचित् महिला गङ्गा-नद्यां निर्माल्यम् क्षिप्तवती अस्ति। सा एकेन यात्रिणा भर्त्सिता।
एतत् दृश्यम् जनैः अन्तर्जाले दृष्टम्।
**काव्या-** आम्, नद्यः अस्माभिः रक्षणीयाः।
अपरा वार्ता पश्चिम-देशात् श्रुता।
तत्र एकेन प्रबन्धकेन स्वस्य भारतीय-कर्मकराय शिशोः कृते समय-अनुकूलता दत्ता। एतत् सुकृतम् सर्वैः प्रशंसितम्।
**नन्दिनी-** अहो उत्तमः प्रबन्धकः!
अन्तिमा वार्ता विस्मयकरी अस्ति।
पारसीक-युद्ध-कारणेन एका पाश्चात्य-सङ्गीतज्ञा भारते अवरुद्धा। तया विशाल-तन्त्रीवाद्येन सह मगध-राज्यस्य ग्रामेषु अटितम्। तत्रत्याभिः प्रजाभिः तस्याः सङ्गीतम् आनन्देन श्रुतम्।
**काव्या-** अतीव सुन्दरः सङ्गीत-प्रभावः!
अद्यतनाय एतावत् एव। धन्यवादाः।

# भगवतः शिवस्य अभावः जातः अस्ति?

कदाचित् कश्चन अर्थी राजानं याचितुम् आगतः। सः अवदत्- 'महाराज! लोके भगवतः शिवस्य अभावः जातः अस्ति' इति।
'कथमेतत्?' इति पृष्टं राज्ञा।
'शिवस्य अर्धं विष्णुना स्वीकृतं, पुनरर्धं पार्वत्या हृतम्। (अर्धनारीश्वरत्वात्) एवं विष्णुना पार्वत्या च अर्धं पुनरर्धं च हृतम् इत्यतः शिवस्य अभावः समुत्पन्नः।'
'एवं तर्हि शिवं श्रितवतां गङ्गाचन्द्रादीनां का गतिः ?'- राजा अपृच्छत्।
'गङ्गा सागरं गता। चन्द्रकला आकाशम् अगमत्। सर्पः पातालम् अगच्छत्। शिवस्य सर्वज्ञत्वम् ईश्वरत्वं च त्वां प्राप्नोत्। वराकं भिक्षाटनं तु मया प्राप्तम्' इति अवदत् अर्थी।
तस्य चाटूक्तिं श्रुतवान् राजा प्रभूतं धनं दत्तवान् इति किं पुनर्वक्तव्यम्?

**डॉ. वर्षा प्रकाश टोणगांवकर**
**पुणे / महाराष्ट्रम्**